# MH-BOARD-CLASS-10-SANSKRIT-COMPOSITE-D-N-893-2023
## Question Paper with Solutions


| | | |
|---|---|---|
| **Time Allowed :**3 Hours | **Maximum Marks :**80 | **Total Questions :**100+6 = 106 |


### सामान्य निर्देश

**सूचनाः :**


1. सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम् ।
2. यथासूचनम् आकलनकृतयः व्याकरणकृतयः आरेखितव्याः ।
3. आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम् ।

**1. (अ) चित्रं दृष्ट्वा नामानि लिखत ।**

(1) 

(2) 

(3) 

(4) 

---

**1. (आ) सङ्ख्याः अक्षरैः/अङ्कैः लिखत ।**

(1) ३०

(2) नव

(3) ७९

---

**1. (इ) समय-स्तम्भमेलनं कुरुत ।**

| 'अ' | 'आ' |
|---|---|
| (1) पञ्चवादनम् | ६.३० |
| (2) सपाद अष्टवादनम् | ५.०० |
| | ८.१५ |

---

**(अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

अस्ति एकं चम्पकं नाम अरण्यम् । अरण्ये चित्राङ्गो नाम मृगः एकाक्षो नाम काकश्च स्नेहेन निवसतः स्म । एकदा चित्राङ्गः वने भ्रमन् केनापि शृगालेन अवलोकितः । क्षुद्रबुद्धिः नाम सः शृगालः स्वार्थहेतुना मृगेण सह मित्रताम् ऐच्छत् । अस्तङ्गते सवितरि क्षुद्रबुद्धिः मृगेण सह मृगस्य निवासस्थानं गतः । मृगशृगालौ दृष्ट्वा काकोऽवदत्, "सखे चित्राङ्ग ! कोऽयं द्वितीयः ?" मृगः अब्रूत, "जम्बूकोऽयम् । अस्मत्सख्यम् इच्छति ।" काकः उपादिशत्, "अकस्मादागन्तुना सह मित्रता न युक्ता ।" तदाकर्ण्य जम्बूकः सकोपम् आह, "मृगस्य प्रथमदर्शने भवानपि अपरिचितः एव आसीत् । यथायं मृगः मम बन्धुः तथा भवानपि ।" मृगः अब्रवीत्, "अलं विवादेन । वयं सर्वे आनन्देन एकत्र निवसामः ।" काकेनोक्तम्, "एवमस्तु ।"

**(1) अवबोधनम् । (क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** शृगालः मृगेण सह सख्यम् इच्छति यतः

(1) शृगालः मृगमांसं खादितुम् इच्छति ।

(2) शृगालः मृगे स्निह्यति ।

**(ख) कः कं वदति ?** "अकस्मादागन्तुना सह मित्रता न युक्ता ।"

**(ग) पूर्णवाक्येन उत्तरं लिखत :** अरण्ये कौ निवसतः स्म ?

---

**(2) शब्दज्ञानम् । (क) गद्यांशात् 2 प्रथमाविभक्त्यन्तपदे चित्वा लिखत ।**

**(ख) गद्यांशात् विशेषण-विशेष्ययोः मेलनं कुरुत ।**

| 'अ' | 'आ' |
| --- | --- |
| (1) भ्रमन् | एकाक्षः |
| (2) अस्तङ्गते | चित्राङ्गः |
| | सवितरि |

**(ग) पूर्वपदं/उत्तरपदं लिखत ।**

(1) केनापि = केन + ______ ।

(2) जम्बूकोऽयम् = ______ + अयम् ।

---

**(आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

(अर्णवः जपाकुसुमं गृहीत्वा प्रविशति ।तस्य पिता विज्ञानस्य प्राध्यापकः ।सः पुस्तकपठने मग्नः । तस्य पार्वे उत्पीठिकायां सूक्ष्मेक्षिका वर्तते ।) **अर्णवः** - पितः, अस्माकम् उद्यानाद् जपाकुसुमम् आनीतं मया ।कियन्तः सूक्ष्माः तस्य परागकणाः ।**पिता** - सूक्ष्मेक्षिकया पश्य, तेषां कणानां रचनाम् अपि द्रष्टुं शक्नोषि !(अर्णवः तथा करोति ।) **पिता** - किं दृष्टं त्वया ? **अर्णवः** - पितः, अद्भुतं एतत् । अत्र परागकणस्य सूक्ष्माणि अङ्गानि दृश्यन्ते । **पिता** - अर्णव, एतानि पुष्पस्य अङ्गानि त्वं सूक्ष्मेक्षिकया द्रष्टुं शक्नोषि । परन्तु एतद् विश्वं परमाणुभ्यः निर्मितम् । ते परमाणवः तु सूक्ष्मेक्षिकया अपि न दृश्यन्ते । **अर्णवः** - परमाणुः नाम किम् ? **पिता** - अस्तु । कथयामि । मुष्टिमात्रान् तण्डुलान् महानसतः आनय । **अर्णवः** - (तथेति उक्त्वा पाकगृहात् तण्डुलान् आनयति ।) स्वीकरोतु, तात ।

---

**(1) अवबोधनम् ।**

**(क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।**

(1) एतद् विश्वं ______ निर्मितम् । (तण्डुलेभ्यः/परमाणुभ्यः)

(2) अर्णवः उद्यानात् ______ गृहीत्वा प्रविशति । (कमलं/जपाकुसुमं)


(ख) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।

परमाणवः सूक्ष्मेक्षिकया दृश्यन्ते ।

(ग) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?

---

(2) प्रवाहि-जालं पूरयत ।




(तण्डुलान् आनयति ।, सूक्ष्मेक्षिकया पश्यति ।, जपाकुसुमं गृहीत्वा प्रविशति ।, परमाणुविषये पृच्छति ।)

---

(इ) गद्यांशं पठित्वा सरलार्थं लिखत ।

(1) वैखानसः (राजानम् अवरुध्य) राजन् । आश्रममृगोऽयं, न हन्तव्यः । आशु प्रतिसंहर सायकम् । राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम् । दुष्यन्तः - प्रतिसंहृत एषः सायकः । (यथोक्तं करोति)

**(इ) (2) श्रोतृवृन्दः - नदीपूजनम् ? किमर्थ नदीपूजनम् ?**

**कीर्तनकारः - नदी खलु जीवनदायिनी । अतः अस्मिन्नवसरे कृतज्ञतां प्रदर्शयितुं जनाः जले दीपदानं कुर्वन्ति । द्रोणे दीपं प्रज्वाल्य नदीजले समर्पयन्ति ।**

---

**(ई) माध्यमभाषया उत्तरं लिखत ।**

**(1) धरित्र्याः उपदेशं मनसि निधाय पृथुवैन्यः किं किम् अकरोत् ?**

---

**(ई) (2) शक्रस्य कपटं विशदीकुरुत ।**

---

**(अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥

अयं न भक्तो न च पूजको वा
घण्टां स्वयं नादयते तथापि ।
धनं जनेभ्यः किल याचतेऽयम्
न याचको वा न च निर्धनो वा ॥

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥

**(क) पूर्णवाक्येन उत्तरं लिखत ।** न्याय्यात्पथः के न विचलन्ति ?

**(ख) विशेषण-विशेष्ययोः मेलनं कुरुत ।**

| 'अ' | 'आ' |
|---|---|
| (1) निरस्तपादपे | विद्वज्जनः |
| (2) श्लाघ्यः | देशे |
| | अल्पधीः |

**(ग) जालरेखाचित्रं पूरयत ।**

**लोकयानवाहकः**

↙ ↘

**न** __________ **न** __________

**(घ) पद्यांशात् 2 द्वितीया-विभक्त्यन्तपदे लिखत ।**

**(च) पूर्वपदं लिखत ।**

(1) अद्यैव = ______ + एव ।

(2) याचतेऽयम् = ______ + अयम् ।

---

**(आ) पद्ये शुद्धे पूर्णे च लिखत ।**

**(1) घटं भिन्द्यात् ... भवेत् ॥**

---

**(2) यादृशं वपते ... फलम् ॥**

---

**(3) वैद्यराज ... धनानि च ॥**

---

**(इ) माध्यमभाषया सरलार्थं लिखत ।**

**(1) अद्ययावद्धि ज्ञानाय वृत्तपत्रं पठेत्सदा । सर्वविधसुविद्यार्थं वाचनमुपकारकम् ॥**

---

**(इ) (2) षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः । तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ॥**

---

**(अ) पृथक्करणम् ।**

**(1) मञ्जूषातः नामानि सर्वनामानि च पृथक्कुरुत ।**

(मञ्जूषा : मम, राजा, सः, नदी, एतस्मिन्)

| **नाम** | **सर्वनाम** |
|---|---|
| | |

---

**(2) मञ्जूषातः क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत ।**

(मञ्जूषा : अकथयत्, मुक्तः, जानाति, भेतव्यम्, वहतु)

| **क्रियापदम्** | **धातुसाधित-विशेषणम्** |
|---|---|
| | |

---

**(आ) निर्दिष्टाः कृतीः कुरुत ।**

**(1) सङ्ख्या/क्रम/आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत ।**

**(क) वेदाः ______ वर्तन्ते । (चत्वारि/चत्वारः)**

**(ख) श्रीकृष्णः देवक्याः ______ अपत्यम् । (अष्टमम्/अष्टः)**

**(ग) अहम् एकं पाठं सम्यक् ______ पठामि । (द्विवारं/ )**

---

**(2) समासविग्रहाणां समासनामभिः सह मेलनं कुरुत ।**

| | समासविग्रहः | समासनाम |
|---|---|---|
| (1) | किञ्चित् जानाति इति। | षष्ठी-तत्पुरुषः। |
| (2) | जलस्य व्यवस्थापनम्। | कर्मधारयः। |
| (3) | लगुडः हस्ते यस्य सः। | उपपद-तत्पुरुषः। |
| (4) | कवयः च पण्डिताः च | अव्ययीभावः। |
| (5) | अहनि अहनि। | बहुव्रीहिः। |
| (6) | मानवता एव धर्मः। | इतरेतर-द्वन्द्वः। |

---

**(3) मञ्जूषातः समानार्थकशब्दान्/विरुद्धार्थकशब्दान् चित्वा लिखत ।**

(मञ्जूषा - सुवर्णम्, निन्दा, असत्यम्, मर्करः)

(1) नक्रः =

(2) स्तुतिः x

(3) कनकम् =

(4) सत्यम् x

(आ) (4) योग्यं पर्यायं चिनुत । (3 तः 2)

(1) पृथुभूपेन धनुः सज्जीकृतम् । (कर्तृवाच्यम्/कर्मवाच्यम्)

(2) त्वं द्रष्टुं ______ । (शक्नोषि/शक्नोति)

(3) वानराः फलानि खादन्ति । ______ (मधुराणि/मधुराः)

(इ) विशिष्ट-विभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (4 तः 2)

(क) कथ् (10 उ.प.)

(ख) अलम्

(ग) स्निह् (4 प.प.)

(घ) कृते